।। চতুর্থোঽধ্যায়ঃ ।।

বিষ্ণুর্ব্রহ্ম তথা দাতেত্যেবং নিত্যমুপাসনম ।
কার্য়মাপদ্যপি ব্রহ্ম তেন য়াত্যপরোক্ষতাম ।। ১ ।।

প্রারব্ধকর্মণোঽন্যস্য জ্ঞানাদেব পরিক্ষয়ঃ ।
অনিষ্টস্যোভয়স্যাপি সর্বস্যান্যস্য ভোগতঃ ।। ২ ।।

উত্তরেষূত্তরেষ্বেবং য়াবদ্বায়ুং বিমুক্তিগাঃ ।
প্রবিশ্য ভুংজতে ভোগাংস্তদংতর্বহিরেব বা ।। ৩ ।।

বায়ুর্বিষ্ণুং প্রবিশ্যৈব ভোগৈশ্চৈবোত্তরোত্তরম ।
উত্ক্রম্য মানুষা মুক্তিং য়াংতি দেহক্ষয়াত সুরাঃ ।। ৪ ।।

অর্চিরাদিপথা বায়ুং প্রাপ্য তেন জনার্দনম ।
য়াংত্যুত্তমা নরোচ্চাদ্যা ব্রহ্মলোকাত সহামুনা ।। ৫ ।।

য়থাসংকল্পভোগাশ্চ চিদানংদশরীরিণঃ ।
জগত্সৃষ্ট্যাদিবিষয়ে মহাসামর্থ্য়মপ্যৃতে ।। ৬ ।।

য়থেষ্টশক্তিমংতশ্চ বিনা স্বাভাবিকোত্তমান ।
অনন্যবশগাশ্চৈব বৃদ্ধিহ্রাসবিবির্জিতাঃ ।
দুঃখাদিরহিতা নিত্যং মোদংতেঽবিরতং সুখম ।। ৭ ।।

পূর্ণপ্রজ্ঞেন মুনিনা সর্বশাস্ত্রার্থসংগ্রহঃ ।

কৃতোঽয়ং প্রীয়তাং তেন পরমাত্মা রমাপতিঃ ।। ৮ ।।

নমো নমোঽশেষদোষদূরপূর্ণগুণাত্মনে ।
বিরিংচিশর্বপূর্বেড্যবংদ্যায় শ্রীবরায় তে ।। ৯ ।।

।। ইতি শ্রীমদানংদতীর্থভগবত্পাদাচার্যবিরচিত ব্রহ্মসূত্রাণুভাষ্যে চতুর্থোঽধ্যায়ঃ ।।

।। ইতি শ্রীমদণুভাষ্যম ।।

www.yousigma.com